# shrIkRiShNachaitanyachandrasya sahasranAmastotram 1

# શ્રીકૃષ્ણચૈતન્યચન્દ્રસ્યસહસ્રનામસ્તોત્રમ્ ૧

## Document Information

Text title : Krishnachaitanyachandra Sahasranama Stotram 1

File name : chaitanyasahasra.itx

Category : sahasranAma, deities_misc, stotra, gurudev

Location : doc_deities_misc

Author : kavi karNapura

Proofread by : Sunder Hattangadi

Latest update : April 20, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 12, 2025

*sanskritdocuments.org*

# શ્રીકૃષ્ણચૈતન્યચન્દ્રસ્યસહસ્રનામસ્તોત્રમ્ ૧

નમસ્તસ્મૈ ભગવતે ચૈતન્યાય મહાત્મને ।
કલિકલ્મષનાશાય ભવાબ્ધિતારણાય ચ ॥ ૧॥

બ્રહ્મણા હરિદાસેન શ્રીરૂપાય પ્રકાશિતમ્ ।
તત્સર્વં કથયિષ્યામિ સાવધાનં નિશામય ॥ ૨॥

શ્રુત્વૈવં વૈષ્ણવાઃ સર્વે પ્રહૃષ્ટાઃ પ્રેમવિહ્વલાઃ ।
સાદરં પરિપપ્રચ્છુઃ પ્રેમગદ્ગદયા ગિરા ॥ ૩॥

વૈષ્ણવાનાં હિ કૃપયા સ્મૃત્વા વાક્યં પિતુસ્તદા ।
સણોન્ત્ય ભગવદ્રૂપં નામાનિ કથયામિ વૈ ॥ ૪॥

ધ્યાનમ્ ।
ૐ અસ્ય શ્રીકૃષ્ણચૈતન્યસહસ્રનામસ્તોત્રસ્ય
નારાયણઃ ઋષિઃ અનુષ્ટુપ્ છન્દઃ શ્રીમદ્ભગવદ્ભક્તિર્દેવતા
શ્રીરાધાકૃષ્ણપ્રીતયે શ્રીકૃષ્ણચૈતન્ય નામસહસ્રપથે વિનિયોગઃ ॥

ૐ નમઃ પ્રેમસમુચ્ચયાય ગોપીજનવલ્લભાય મહાત્મને ।
ૐ વિશ્વમ્ભરઃ સદાનન્દો વિશ્વજિદ્વિશ્વભાવનઃ ।
મહાનુભાવો વિશ્વાત્મા ગૌરાઙ્ગો ગૌરભાવનઃ ॥ ૫॥

હેમપ્રભો દીર્ઘબાહુર્દીર્ઘગ્રીવઃ શુચિર્વસુઃ ।
ચૈતન્યશ્ચેતનશ્ચેતશ્ચિત્તરૂપી પ્રભુઃ સ્વયમ્ ॥ ૬॥

રાધાઙ્ગી રાધિકાભાવો રાધાન્વેશી પ્રિયંવદઃ ।
નીતિજ્ઞઃ સર્વધર્મજ્ઞો ભક્તિમાન્ પુરુષોત્તમઃ ॥ ૭॥

અનુભાવી મહાધૈર્યઃ શાસ્ત્રજ્ઞો નિત્યનૂતનઃ ।
પ્રભાવી ભગવાન્ કૃષ્ણશ્ચૈતન્યો રસવિગ્રહઃ ॥ ૮॥

અનાદિનિધનો ધાતા ધરણીમન્દનઃ શુચિઃ ।

વરાઙ્ગશ્ચઞ્ચલો દક્ષઃ પ્રતાપી સાધુસઙ્ગતઃ ॥ ૯॥

ઉન્માદી ઉન્મદો વીરો ધીરગ્રાણી રસપ્રિયઃ ।
રક્તામ્બરો દણ્ડધરઃ સંન્યાસી યતિભૂષણઃ ॥ ૧૦॥

દણ્ડી છત્રી ચક્રપાણિઃ કૃપાલુઃ સર્વદર્શનઃ ।
નિરાયુધઃ સર્વશાસ્તા કલિદોષપ્રનાશનઃ ॥ ૧૧॥

ગુરુવર્યઃ કૃપાસિન્ધુર્વિક્રમી ચ જનાર્દનઃ ।
મ્લેચ્છગ્રાહી કુનીતિઘ્નો દુષ્ટહારી કૃપાકુલઃ ॥ ૧૨॥

બ્રહ્મચારી યતિવરો બ્રહ્મણ્યો બ્રાહ્મણઃ સુધીઃ ।
દ્વિજરાજશ્ચક્રવર્તી કવિઃ કૃપણવત્સલઃ ॥ ૧૩॥

નિરીહઃ પાવકોઽર્થજ્ઞો નિર્ધૂમઃ પાવકોપમઃ ।
નારવન્દ્યો હરાકારો ભવિષ્ણુર્નરનાયકઃ ॥ ૧૪॥

દાનવીરો યુદ્ધવીરો દયાવીરો વૃકોદરઃ ।
જ્ઞાનવીરો મહાવીરઃ શાન્તિવીરઃ પ્રતાપનઃ ॥ ૧૫॥

શ્રીજિષ્ણુર્ભ્રમિકો જિષ્ણુઃ સહિષ્ણુશ્ચારુદર્શનઃ ।
નરો વરીયાન્ દુર્દર્શો નવદ્વીપસુધાકરઃ ॥ ૧૬॥

ચન્દ્રહાસ્યશ્ચન્દ્રનખો બલિમદ્દરો બલી ।
સૂર્યપ્રભઃ સૂર્યકાંશુઃ સૂર્યાઙ્ગો મણિભૂષણઃ ॥ ૧૭॥

કમ્બુકણ્ઠઃ કપોલશ્રીર્નિમ્નનાભિઃ સુલોચનઃ ।
જગન્નાથસુતો વિપ્રો રત્નાઙ્ગો રત્નભૂષણઃ ॥ ૧૮॥

તીર્થાર્થી તીર્થદસ્તીર્થસ્તીર્થાઙ્ગસ્તીર્થસાધકઃ ।
તીર્થાસ્પદસ્તીર્થવાસસ્તીર્થસેવી નિરાશ્રયઃ ॥ ૧૯॥

તીર્થાલાદી તીર્થપ્રદો બ્રાહ્મકો બ્રહ્મણો ભ્રમી ।
શ્રીવાસપણ્ડિતાનન્દો રામાનન્દપ્રિયઙ્કરઃ ॥ ૨૦॥

ગદાધરપ્રિયો દાસો વિક્રમી શઙ્કરપ્રિયઃ ।
યોગી યોગપ્રદો યોગો યોગકારી ત્રિયોગકૃત્ ॥ ૨૧॥

સર્વઃ સર્વસ્વદો ભૂમા સર્વાઙ્ગઃ સર્વસમ્ભવઃ ।
વાણિર્બાણાયુધો વાદી વાચસ્પતિરયોનિજઃ ॥ ૨૨॥

બુદ્ધિઃ સત્યં બલં તેજો ધૃતિમાન્ જઙ્ગમકૃતિઃ ।
મુરારિર્વર્ધનો ધાતા નૃહરિઃ માનવર્ધનઃ ॥ ૨૩ ॥

નિષ્કર્મા કર્મદો નાથઃ કર્મજ્ઞઃ કર્મનાશકઃ ।
અનર્ઘઃ કારકઃ કર્મ ક્રિયાર્હઃ કર્મબાધકઃ ॥ ૨૪ ॥

નિર્ગુણો ગુણવાનીશો વિધાતા સામગોઽજિતઃ ।
જિતશ્વાસો જિતપ્રાણો જિતાનઙ્ગો જિતેન્દ્રિયઃ ॥ ૨૫ ॥

કૃષ્ણભાવી કૃષ્ણનામી કૃષ્ણાત્મા કૃષ્ણનાયકઃ ।
અદ્વૈતો દ્વૈતસાહિત્યો દ્વિભાવઃ પાલકો વશી ॥ ૨૬ ॥

શ્રીવાસઃ શ્રીધરાહવ્યો હલનાયકસારવિત્ ।
વિશ્વરૂપાનુજશ્ચન્દ્રો વરીયાન્ માધવોઽચ્યુતઃ ॥ ૨૭ ॥

રૂપાસક્તઃ સદાચારો ગુણજ્ઞો બહુભાવકઃ ।
ગુણહીનો ગુણાતીતો ગુણગ્રાહી ગુણાર્ણવઃ ॥ ૨૮ ॥

બ્રહ્માનન્દો નિત્યાનન્દઃ પ્રેમાનન્દોઽતિનન્દકઃ ।
નિન્દ્યહારી નિન્દ્યવર્જી નિન્દ્યઘ્નઃ પરિતોષકઃ ॥ ૨૯ ॥

યજ્ઞબાહુર્વિનીતાત્મા નામયજ્ઞપ્રચારકઃ ।
કલિવર્યઃ સુચિનાંશુઃ પર્યાંસુઃ પાવકોપમઃ ॥ ૩૦ ॥

હિરણ્યગર્ભઃ સૂક્ષ્માત્મા વૈરાજ્યો વિરજાપતિઃ ।
વિલાસી પ્રભાવી સ્વાંશી પરાવસ્થઃ શિરોમણિઃ ॥ ૩૧ ॥

માયાઘ્નો માયિકો માયી માયાવાદી વિચક્ષણઃ ।
કૃષ્ણાચ્છાદી કૃષ્ણજલ્પી વિષયઘ્નો નિરાકૃતિઃ ॥ ૩૨ ॥

સઙ્કુલ્પશૂન્યો માયીશો માયાદ્વેશી વ્રજપ્રિયઃ ।
વ્રજાધીશો વ્રજપતિર્ગોપગોકુલનન્દનઃ ॥ ૩૩ ॥

વ્રજવાસી વ્રજભાવો વ્રજનાયકસત્તમઃ ।
ગુપ્તપ્રિયો ગુપ્તભાવો વાઞ્છિતઃ સત્કુલાશ્રયઃ ॥ ૩૪ ॥

રાગાનુગો રાગસિન્ધૂ રાગાત્મા રાગવર્ધનઃ ।
રાગોદ્ભતઃ પ્રેમસાક્ષી ભટ્ટનાથઃ સનાતનઃ ॥ ૩૫ ॥

ગોપાલભટ્ટગઃ પ્રીતો લોકનાથપ્રિયઃ પટુઃ ।
દ્વિભુજઃ ષડ્ભુજો રૂપી રાજદર્પવિનાશનઃ ॥ ૩૬ ॥

કાશિમિશ્રપ્રિયો વન્દ્યો વન્દનીયઃ શચિપ્રસૂઃ ।
મિશ્રપુરન્દરાધિસો રઘુનાથપ્રિયો રયઃ ॥ ૩૭॥

સાર્વભૌમદર્પહારી અમોઘારિર્વસુપ્રિયઃ ।
સહજઃ સહજાધીશઃ શાશ્વતઃ પ્રણયાતુરઃ ॥ ૩૮॥

કિલકિઞ્ચિદભાવાર્તઃ પાણ્ડુગણ્ડઃ શુચાતુરઃ ।
પ્રલાપી બહુવાક્ શુદ્ધઃ ઋજુર્વક્રગતિઃ શિવઃ ॥ ૩૯॥

ઘત્તાયિતોઽરવિન્દાક્ષઃ પ્રેમવૈચિત્યલક્ષકઃ ।
પ્રિયાભિમાની ચતુરઃ પ્રિયાવર્તી પ્રિયોન્મુખઃ ॥ ૪૦॥

લોમાઞ્ચિતઃ કમ્પધરઃ અશ્રુમુખો વિશોકહા ।
હાસ્યપ્રિયો હાસ્યકારી હાસ્યયુગ્ હાસ્યનાગરઃ ॥ ૪૧॥

હાસ્યગ્રામી હાસ્યકરસ્ત્રિભઙ્ગી નર્તનાકુલઃ ।
ઊર્ધ્વલોમા ઊર્ધ્વહસ્ત ઊર્ધ્વરાવી વિકારવાન્ ॥ ૪૨॥

ભવોલ્લાસી ધીરશાન્તો ધીરઙ્ગો ધીરનાયકઃ ।
દેવાસ્પદો દેવધામા દેવદેવો મનોભવઃ ॥ ૪૩॥

હેમાદ્રિર્હેમલાવણ્યઃ સુમેરુર્બ્રહ્મસાદનઃ ।
ઐરાવતસ્વર્ણકાન્તિઃ શરદ્ઘો વાઞ્છિતપ્રદઃ ॥ ૪૪॥

કરોભોરૂઃ સુદીર્ઘાક્ષઃ કમ્પભ્રૂચક્ષુનાસિકઃ ।
નામગ્રન્થી નામસઙ્ખ્યા ભાવબદ્ધસ્તૃષાહરઃ ॥ ૪૫॥

પાપાકર્ષી પાપહારી પાપઘ્નઃ પાપશોધકઃ ।
દર્પહા ધનદોઽરિઘ્નો માનહા રિપુહા મધુઃ ॥ ૪૬॥

રૂપહા વેશહા દિવ્યો દીનબન્ધુઃ કૃપામયઃ ।
સુધક્ષરઃ સુધાસ્વાદી સુધામા કમનીયકઃ ॥ ૪૭॥

નિર્મુક્તો મુક્તિદો મુક્તો મુક્તાખ્યો મુક્તિબાધકઃ ।
નિઃશઙ્કો નિરહઙ્કારો નિર્વૈરો વિપદાપહઃ ॥ ૪૮॥

વિદગ્ધો નવલાવણ્યો નવદ્વીપદ્વિજ પ્રભુઃ ।
નિરઙ્કુશો દેવવન્દ્યઃ સુરાચાર્યઃ સુરારિહા ॥ ૪૯॥

સુરવર્યો નિન્દ્યહારી વાદઘ્નઃ પરિતોષકઃ ।

સુપ્રકાશો બૃહદ્બાહુર્મિત્રજ્ઞઃ કવિભૂષણઃ ॥ ૫૦ ॥

વરપ્રદો વરપાઙ્ગો વરયુગ્ વરનાયકઃ ।
પુષ્પહાસઃ પદ્મગન્ધિઃ પદ્મરાગઃ પ્રજાગરઃ ॥ ૫૧ ॥

ઊર્ધ્વગઃ સત્પથાચારી પ્રાણદ ઊર્ધ્વગાયકઃ ।
જનપ્રિયો જનાહ્લાદો જનકઋષિ જનસ્પૃહઃ ॥ ૫૨ ॥

અજન્મા જન્મનિલયો જનાનદો જનાર્દ્રધીઃ ।
જગન્નાથો જગદ્બન્ધુર્જગદ્દેવો જગત્પતિઃ ॥ ૫૩ ॥

જનકારી જનામોદો જનકાનન્દસાગ્રહઃ ।
કલિપ્રિયઃ કલિશ્લાઘ્યઃ કલિમાનવિવર્ધનઃ ॥ ૫૪ ॥

કલિવર્યઃ સદાનન્દઃ કલિકૃત્ કલિધન્યમાન્ ।
વર્ધામનઃ શ્રુતિધરઃ વર્ધનો વૃદ્ધિદાયકઃ ॥ ૫૫ ॥

સમ્પદઃ શારણો દક્ષો ઘૃણાઙ્ગી કલિરક્ષકઃ ।
કલિધન્યઃ સમયજ્ઞઃ કલિપુણ્યપ્રકાશકઃ ॥ ૫૬ ॥

નિશ્ચિન્તો ધીરલલિતો ધીરવાક્ પ્રેયસીપ્રિયઃ ।
વામાસ્પર્શી વામભાવો વામરૂપો મનોહરઃ ॥ ૫૭ ॥

અતીન્દ્રિયઃ સુરાધ્યક્ષો લોકાધ્યક્ષઃ કૃતકૃતઃ ।
યુગાદિકૃદ્ યુગકરો યુગજ્ઞો યુગનાયકઃ ॥ ૫૮ ॥

યુગાવર્તો યુગાસીમઃ કાલવાન્ કાલશક્તિધૃક્ ।
પ્રણયઃ શાશ્વતો હૃષ્ટો વિશ્વજિદ્ બુદ્ધિમોહનઃ ॥ ૫૯ ॥

સન્ધ્યાતા ધ્યાનકૃદ્ ધ્યાની ધ્યાનમઙ્ગલસન્ધિમાન્ ।
વિસ્રુતાત્મા હૃદિસ્થિરો ગ્રામનિયપ્રગ્રાહકઃ ॥ ૬૦ ॥

સ્વરમૂર્ચ્છી સ્વરાલાપી સ્વરમૂર્તિવિભૂષણઃ ।
ગાનગ્રાહી ગાનલુબ્ધો ગાયકો ગાનવર્ધનઃ ॥ ૬૧ ॥

ગાનમાન્યો હ્યપ્રમેયઃ સત્કર્તા વિશ્વધૃક્ સહઃ ।
ક્ષીરાબ્ધિકમથાકારઃ પ્રેમગર્ભઝષાકૃતિઃ ॥ ૬૨ ॥

બીભત્સુર્ભાવહૃદયઃ અદૃશ્યો બર્હિદર્શકઃ ।
જ્ઞાનરુદ્ધો ધીરબુદ્ધિરખિલાત્મપ્રિયઃ સુધીઃ ॥ ૬૩ ॥

અમેયઃ સર્વવિદ્ભાનુર્બભ્રૂર્બહુશિરો રુચિઃ ।
ઉરુશ્રવાઃ મહાદીર્ઘો વૃષકર્મા વૃષાકૃતિઃ ॥ ૬૪॥

શ્રુતિસ્મૃતિધરો વેદઃ શ્રુતિજ્ઞઃ શ્રુતિબાધકઃ ।
હૃદિસ્પૃશ આસ આત્મા શ્રુતિસારો વિચક્ષણઃ ॥ ૬૫॥

કલાપી નિરનુગ્રાહી વૈદ્યવિદ્યાપ્રચારકઃ ।
મીમાંસકારિર્વેદાઙ્ગ વેદાર્થપ્રભવો ગતિઃ ॥ ૬૬॥

પરાવરજ્ઞો દુષ્પારો વિરહાઙ્ગી સતાં ગતિઃ ।
અસઙ્ખ્યેયોઽપ્રમેયાત્મા સિદ્ધિદઃ સિદ્ધિસાધનઃ ॥ ૬૭॥

ધર્મસેતુર્ધર્મપરો ધર્માત્મા ધર્મભાવનઃ ।
ઉદીર્ણસંશયચ્છિન્નો વિભૂતિઃ શાશ્વતઃ સ્થિરઃ ॥ ૬૮॥

શુદ્ધાત્મા શોભનોત્કણ્ઠોઽનિર્દેશ્યઃ સાધનપ્રિયઃ ।
ગ્રન્થપ્રિયો ગ્રન્થમયઃ શાસ્ત્રયોનિર્મહાશયઃ ॥ ૬૯॥

અવર્ણો વર્ણનિલયો નાશ્રમી ચતુરાશ્રમઃ ।
અવિપ્ર વિપ્રકૃત્ સ્તુત્યો રાજન્યો રાજ્યનાશકઃ ॥ ૭૦॥

અવશ્યો વશ્યતાધીનઃ શ્રીભક્તિવ્યવસાયકઃ ।
મનોજવઃ પુરયિતા ભક્તિકીર્તિરનામયઃ ॥ ૭૧॥

નિધિવર્જી ભક્તિનિધિર્દુર્લભો દુર્ગભાવકૃત્ ।
કર્તનીઃ કીર્તિરતુલઃ અમૃતો મુરજપ્રિયઃ ॥ ૭૨॥

શૃઙ્ગારઃ પઞ્ચમો ભાવો ભાવયોનિરનન્તરઃ ।
ભક્તિજિત્ પ્રેમભોજી ચ નવભક્તિપ્રચારકઃ ॥ ૭૩॥

ત્રિગર્તસ્ત્રિગુણામોદસ્ત્રિવાઞ્છી પ્રીતિવર્ધનઃ ।
નિયન્તા શ્રમગોઽતીતઃ પોષણો વિગતજ્વરઃ ॥ ૭૪॥

પ્રેમજ્વરો વિમાનાર્હઃ અર્થહા સ્વપ્નનાશનઃ ।
ઉત્તારણો નામપુણ્યઃ પાપપુણ્યવિવર્જિતઃ ॥ ૭૫॥

અપરાધહરઃ પાલ્યઃ સ્વસ્તિદઃ સ્વસ્તિભૂષણઃ ।
પૂતાત્મા પૂતગઃ પૂતઃ પૂતભાવો મહાસ્વનઃ ॥ ૭૬॥

ક્ષેત્રજ્ઞઃ ક્ષેત્રવિજયી ક્ષેત્રવાસો જગત્પ્રસૂઃ ।
ભયહા ભયદો ભાસ્વાન્ ગૌણભાવસમન્વિતઃ ॥ ૭૭॥

મણ્ડિતો મણ્ડલકરો વૈજયન્તીપવિત્રકઃ ।
ચિત્રાઙ્ગશ્ચિત્રિતશ્ચિત્રો ભક્તચિત્તપ્રકાશકઃ ॥ ૭૮॥

બુદ્ધિગો બુદ્ધિદો બુદ્ધિર્બુદ્ધિધૃગ્ બુદ્ધિવર્ધનઃ ।
પ્રેમાદ્રિધૃક્ પ્રેમવહો રતિવોઢ રતિસ્પૃશઃ ॥ ૭૯॥

પ્રેમચક્ષુઃ પ્રેમગન્ધઃ પ્રેમહૃત્ પ્રેમપૂરકઃ ।
ગમ્ભીરગો બહિર્વાસો ભાવાનુષ્ઠિતગો પતિઃ ॥ ૮૦॥

નૈકરૂપો નૈકભાવો નૈકાત્મા નૈકરૂપધૃક્ ।
શ્લથસન્ધિઃ ક્ષીણધર્મસ્ત્યક્તપાપ ઉરુશ્રવઃ ॥ ૮૧॥

ઉરુગાય ઉરુગ્રીવ ઉરુભાવ ઉરુક્રમઃ ।
નિર્ધૂતો નિર્મલો ભાવો નિરીહો નિરનુગ્રહઃ ॥ ૮૨॥

નિર્ધૂમોઽગ્નિઃ સુપ્રતાપસ્તીવ્રતાપો હુતાશનઃ ।
એકો મહદ્ભૂતવ્યાપી પૃથગ્ભૂતઃ અનેકશઃ ॥ ૮૩॥

નિર્ણયી નિરનુજ્ઞાતો દુષ્ટગ્રામનિવર્તકઃ ।
વિપ્રબન્ધુઃ પ્રિયો રુચ્યો રોચકાઙ્ગો નરાધિપઃ ॥ ૮૪॥

લોકાધ્યક્ષઃ સુવર્ણાભઃ કનકાબ્જઃ શિખામણિઃ ।
હેમકુમ્ભો ધર્મસેતુર્લોકનાથો જગદ્ગુરુઃ ॥ ૮૫॥

લોહિતાક્ષો નામકર્મા ભાવસ્થો હૃદ્ગુહાશયઃ ।
રસપ્રાણો રતિજ્યેષ્ઠો રસાબ્ધિરતિરાકુલઃ ॥ ૮૬॥

ભાવસિન્ધુર્ભક્તિમેઘો રસવર્ષી જનાકુલઃ ।
પીતાબ્જો નીલપીતાભો રતિભોક્તા રસાયનઃ ॥ ૮૭॥

અવ્યક્તઃ સ્વર્ણરાજીવો વિવર્ણી સાધુદર્શનઃ ।
અમૃત્યુઃ મૃત્યુદોઽરુદ્ધઃ સન્ધાતા મૃત્યુવઞ્ચકઃ ॥ ૮૮॥

પ્રેમોન્મત્તઃ કીર્તનર્ત્તઃ સઙ્કીર્તનપિતા સુરઃ ।
ભક્તિગ્રામઃ સુસિદ્ધાર્થઃ સિદ્ધિદઃ સિદ્ધિસાધનઃ ॥ ૮૯॥

પ્રેમોદરઃ પ્રેમવાહૂ લોકભર્તા દિશામ્પતિઃ ।
અન્તઃ કૃષ્ણો બહિર્ગૌરો દર્શકો રતિવિસ્તરઃ ॥ ૯૦॥

સઙ્કલ્પસિદ્ધો વાઞ્છાત્મા અતુલઃ સચ્છરીરભૃત્ ।

ઋદ્ધાર્થઃ કરુણાપાઙ્ગો નદકૃદ્ ભક્તવત્સલઃ ॥ ૯૧॥

અમત્સરઃ પરાનન્દઃ કૌપીની ભક્તિપોષકઃ ।
અકૈતવો નામમાલી વેગવાન્ પૂર્ણલક્ષણઃ ॥ ૯૨॥

મિતાશનો વિવર્તાક્ષો વ્યવસાયા વ્યવસ્થિતઃ ।
રતિસ્થાનો રતિવનઃ પશ્ચાત્તુષ્ટઃ શમાકુલઃ ॥ ૯૩॥

ક્ષોભણો વિરભો માર્ગો માર્ગધૃગ્ વર્ત્મદર્શકઃ ।
નીચાશ્રમી નીચમાની વિસ્તારો બીજમવ્યયઃ ॥ ૯૪॥

મોહકાયઃ સૂક્ષ્મગતિર્મહેજ્યઃ સત્રવર્ધનઃ ।
સુમુખઃ સ્વાપનોઽનાદિઃ સુકૃત્ પાપવિદારણઃ ॥ ૯૫॥

શ્રીનિવાસો ગભીરાત્મા શ◌ૃઙ્ગારકનકાદૃતઃ ।
ગભીરો ગહનો વેધા સાઙ્ગોપાઙ્ગો વૃષપ્રિયઃ ॥ ૯૬॥

ઉદીર્ણરાગો વૈચિત્રી શ્રીકરઃ સ્તવનાર્હકઃ ।
અશ્રુચક્ષુર્જલાબ્યઙ્ગ પૂરિતો રતિપૂરકઃ ॥ ૯૭॥

સ્તોત્રાયણઃ સ્તવાધ્યક્ષઃ સ્તવનીયઃ સ્તવાકુલઃ ।
ઊર્ધ્વરેતઃ સન્નિવાસઃ પ્રેમમૂર્તિઃ શતાનલઃ ॥ ૯૮॥

ભક્તબન્ધુર્લોકબન્ધુઃ પ્રેમબન્ધુઃ શતાકુલઃ ।
સત્યમેધા શ્રુતિધરઃ સર્વશસ્ત્રભૃતાંવરઃ ॥ ૯૯॥

ભક્તિદ્વારો ભક્તિગૃહઃ પ્રેમાગારો નિરોધહા ।
ઉદ્ઘૂર્ણો ઘૂર્ણિતમના આઘૂર્નિતકલેવરઃ ॥ ૧૦૦॥

ભવભ્રાન્તિજસન્દેહઃ પ્રેમરાશિઃ શુચાપહઃ ।
કૃપાચાર્યઃ પ્રેમસઙ્ગો વયુનઃ સ્થિરયૌવનઃ ॥ ૧૦૧॥

સિન્ધુગઃ પ્રેમસઙ્ગાહઃ પ્રેમવશ્યો વિચક્ષણઃ ।
પદ્મકિઞ્જલ્કસઙ્કાશઃ પ્રેમાદારો નિયામકઃ ॥ ૧૦૨॥

વિરક્તો વિગતારાતિર્નાપેક્ષો નારદદૃતઃ ।
નતસ્થો દક્ષિણઃ ક્ષામઃ શઠજીવપ્રતારકઃ ॥ ૧૦૩॥

નામપ્રવર્તકોઽનર્થો ધર્મોગુર્વાદિપુરુષઃ ।
ન્યગ્રોધો જનકો જાતો વૈનત્યો ભક્તિપાદપઃ ॥ ૧૦૪॥

આત્મમોહઃ પ્રેમલીધઃ આત્મભાવાનુગો વિરાટ્ ।
માધુર્યવત્ સ્વાત્મરતો ગૌરખ્યો વિપ્રરૂપધૃક્ ॥ ૧૦૫ ॥

રાધારૂપી મહાભાવી રાધ્યો રાધનતત્પરઃ ।
ગોપીનાથાત્મકોઽદૃશ્યઃ સ્વાધિકારપ્રસાધકઃ ॥ ૧૦૬ ॥

નિત્યાસ્પદો નિત્યરૂપી નિત્યભાવપ્રકાશકઃ ।
સુસ્થભાવશ્ચપલધીઃ સ્વચ્છગો ભક્તિપોષકઃ ॥ ૧૦૭ ॥

સર્વત્રગસ્તીર્થભૂતો હૃદિસ્થઃ કમલાસનઃ ।
સર્વભાવાનુગાધીશઃ સર્વમઙ્ગલકારકઃ ॥ ૧૦૮ ॥

ઇત્યેતત્કથિતં નિત્યં સાહસ્રં નામસુન્દરમ્ ।
ગોલોકવાસિનો વિષ્ણોર્ગૌરરૂપસ્ય શાર્ઙ્ગિનઃ ॥ ૧૦૯ ॥

ઇદં ગૌરસહસ્રાખ્યામ્ આમયઘ્નં શુચાપહમ્ ।
પ્રેમભક્તિપ્રદં નૃણાં ગોવિન્દાકર્ષકં પરમ્ ॥ ૧૧૦ ॥

પ્રાતઃકાલે ચ મધ્યાહ્ને સન્ધ્યાયાં મધ્યરાત્રિકે ।
યઃ પઠેત્પ્રયતો ભક્ત્યા ચૈતન્યે લભતે રતિમ્ ॥ ૧૧૧ ॥

નામાત્મકો ગૌરદેવો યસ્ય ચેતસિ વર્તતે ।
સ સર્વં વિષયં ત્યક્ત્વા ભાવાનન્દો ભવેદ્ધ્રુવમ્ ॥ ૧૧૨ ॥

યસ્મૈ કસ્મૈ ન દાતવ્યમ્ દાને તુ ભક્તિહા ભવેત્ ।
વિનીતાય પ્રશાન્તાય ગૌરભક્તાય ધીમતે ॥ ૧૧૩ ॥

તસ્મૈ દેયં તતો ગ્રાહ્યમિતિ વૈષ્ણવશાસનમ્ ॥

ઇતિ શ્રીકવિકર્ણપૂરવિરચિતમ્ શ્રીકૃષ્ણચૈતન્યચન્દ્રસ્ય
સહસ્રનામસ્તોત્રં ૧ સમ્પૂર્ણમ્ ॥

*shrIkRiShNachaitanyachandrasya sahasranAmastotram 1*

pdf was typeset on March 12, 2025

Please send corrections to *sanskrit@cheerful.com*